श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टाशीतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टाशीतितमं दशकम् ॥

## सन्तानगोपालोपाख्यानम्

प्रागेवाचार्यपुत्राहृतिनिशमनया स्वीयषट्सूनुवीक्षां
काङ्क्षन्त्या मातुरुक्त्या सुतलभुवि बलिं प्राप्य तेनार्चितस्त्वम्।
धातुः शापाद्धिरण्यान्वितकशिपु भवान् शौरिजान् कंसभग्ना -
नानीयैनान् प्रदर्श्य स्वपदमनयथाः पूर्वपुत्रान् मरीचेः ॥ **88.1** ॥

श्रुतदेव इति श्रुतं द्विजेन्द्रं
बहुलाश्वं नृपतिं च भक्तिपूर्णम्।
युगपत्त्वमनुग्रहीतुकामो
मिथिलां प्रापिथ तापसैः समेतः ॥ **88.2** ॥

गच्छन् द्विमूर्तिरुभयोर्युगपन्निकेत -
मेकेन भूरिविभवैर्विहितोपचारः।
अन्येन तद्दिनभृतैश्च फलौदनाद्यै -
स्तुल्यं प्रसेदिथ ददाथ च मुक्तिमाभ्याम् ॥ **88.3** ॥

भूयोऽथ द्वारवत्यां द्विजतनयमृतिं तत्प्रलापानपि त्वं
को वा दैवं निरुन्ध्यादिति किल कथयन् विश्ववोढाऽप्यसोढाः।
जिष्णोर्गर्वं विनेतुं त्वयि मनुजधिया कुण्ठितां चास्य बुद्धिं
तत्त्वारूढां विधातुं परमतमपदप्रेक्षणेनेति मन्ये ॥ **88.4** ॥

नष्टा अष्टास्य पुत्राः पुनरपि तव तूपेक्षया कष्टवादः
स्पष्टो जातो जनानामथ तदवसरे द्वारकामाप पार्थः।

मैत्र्या तत्रोषितोऽसौ नवमसुतमृतौ विप्रवर्यप्ररोदं
श्रुत्वा चक्रे प्रतिज्ञामनुपहृतसुतः सन्निवेक्ष्ये कृशानुम्॥ **88.5**॥

मानी स त्वामपृष्ट्वा द्विजनिलयगतो बाणजालैर्महास्त्रैः
रुन्धानः सूतिगेहं पुनरपि सहसा दृष्टनष्टे कुमारे।
याम्यामैन्द्रीं तथाऽन्याः सुरवरनगरीर्विद्ययाऽऽसाद्य सद्यो
मोघोद्योगः पतिष्यन् हुतभुजि भवता सस्मितं वारितोऽभूत्॥ **88.6**॥

सार्धं तेन प्रतीचीं दिशमतिजविना स्यन्दनेनाभियातो
लोकालोकं व्यतीतस्तिमिरभरमथो चक्रधाम्ना निरुन्धन्।
चक्रांशुक्लिष्टदृष्टिं स्थितमथ विजयं पश्य पश्येति वारां
पारे त्वं प्राददर्शः किमपि हि तमसां दूरदूरं पदं ते॥ **88.7**॥

तत्रासीनं भुजङ्गाधिपशयनतले दिव्यभूषायुधाद्यै -
रावीतं पीतचेलं प्रतिनवजलदश्यामलं श्रीमदङ्गम्।
मूर्तीनामीशितारं परमिह तिसृणामेकमर्थं श्रुतीनां
त्वामेव त्वं परात्मन् प्रियसखसहितो नेमिथ क्षेमरूपम्॥ **88.8**॥

युवां मामेव द्वावधिकविवृतान्तर्हिततया
विभिन्नौ सन्द्रष्टुं स्वयमहमहार्षं द्विजसुतान्।
नयेतं द्रागेतानिति खलु वितीर्णान् पुनरमून्
द्विजायादायादाः प्रणुतमहिमा पाण्डुजनुषा॥ **88.9**॥

एवं नानाविहारैर्जगदभिरमयन् वृष्णिवंशं प्रपुष्ण -
न्नीजानो यज्ञभेदैरतुलविहृतिभिः प्रीणयन्नेणनेत्राः।
भूभारक्षेपदम्भात् पदकमलजुषां मोक्षणायावतीर्णः
पूर्णं ब्रह्मैव साक्षाद्यदुषु मनुजतारूषितस्त्वं व्यलासीः॥ **88.10**॥

प्रायेण द्वारवत्यामवृतदयि तदा नारदस्त्वद्रसार्द्र -
स्तस्माल्लेभे कदाचित्खलु सुकृतनिधिस्त्वत्पिता तत्त्वबोधम्।

भक्तानामग्रयायी स च खलु मतिमानुद्धवस्त्वत्त एव
    प्राप्तो विज्ञानसारं स किल जनहितायाधुनाऽऽस्ते बदर्याम् ॥ **88.11** ॥

सोऽयं कृष्णावतारो जयति तव विभो यत्र सौहार्दभीति -
    स्नेहद्वेषानुरागप्रभृतिभिरतुलैरश्रमैर्योगभेदैः ।
आर्तिं तीर्त्वा समस्ताममृतपदमगुस्सर्वतः सर्वलोकाः
    स त्वं विश्वार्तिशान्त्यै पवनपुरपते भक्तिपूर्त्यै च भूयाः ॥ **88.12** ॥

॥ इति श्रीमन्नारायणीये अष्टाशीतितमं दशकं समाप्तम् ॥